# Vireshvara Stuti - 4

# વીરેશ્વરસ્તુતિઃ - ૪

## Document Information

Text title : Vireshvara Stuti - 4

File name : vIreshvarastutiH4.itx

Category : shiva, stuti, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 47| 91-103 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# Vireshvara Stuti - 4

# વીરેશ્વરસ્તુતિઃ - ૪

॥ વીરેશ્વરસ્તુતિઃ - ૪ - ત્ર્યક્ષાક્ષોભ્યાપરાધહરણાર્થં નિવેદનમ્ ॥

શ્રીકાશીનાથ કાશીપુરરુચિરકથાકર્ણનેન પ્રવૃત્તં
ચિત્તં મત્તં કથં વા કથમપિ ન તયોર્વર્ણને વા પ્રવીણમ્ ।
કર્ણ શીર્ણં ન પુણ્યં ક્ષણમપિ નિપુણં પ્રાણિનાં પ્રીણનં વા
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૧॥

પુણ્યારણ્યપ્રકીર્ણપ્રણતસુરતરુશ્રીયુતાનન્દસઙ્ગ-
વ્યાસઙ્ગાભઙ્ગગઙ્ગોજ્વલમિલિતતલશ્રીફલશ્રીલમૂલે ।
તુઙ્ગં લિઙ્ગં નિરઙ્ગં નિગમમનુગતં પ્રોક્ષિતં દીક્ષિતં વા
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૨॥

સ્નાત્વા ન બ્રહ્મનાલે સિતભસિતકૃતોદ્ધૂલનશ્રીત્રિપુણ્ડ્ર
શ્રીરુદ્રાક્ષાવૃતાઙ્ગઃ કૃતનિયમવિધિઃ સ્વર્ધુનીપૂરતીરે ।
શ્રીરુદ્રાધ્યાયવર્ણપ્રવણનિપુણધીર્ન સ્મરામિ સ્મરારિં
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાપૂરસારૈકસિન્ધો ॥ ૩॥

સંસારાપારઘોરજ્વરકરખ દિરાઙ્ગારપૂરપ્રસાર-
વ્યાપારા નેક શોકવ્યતિકરનિકરવ્યાકુલો બાલલીલઃ ।
કાલે કાલેઽનુવેલપ્રલયભયભયં ન શ્રયામો મહેશં
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૪॥

અશ્રાન્તાનન્તચિન્તાહૃદવિતતમતિઃ સ્વાન્તપદ્માસનસ્થં
સ્વચ્છં શાન્તં નિતાન્તં નતમમરગણૈઃ સંસ્તુતં વેદસઙ્ઘૈઃ ।
અસ્તાવિદ્યાવિલાસવ્યસનમતિમતં સાધુ નારોપયામઃ
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૫॥

ભસ્માભ્યઙ્ગક્ષણાર્ધપ્રતિહતવિમુખાનઙ્ગમઙ્ગીકૃતાઙ્ગ
શાઙ્ગં ગઙ્ગાતરઙ્ગં પ્રતિભટવિલસદ્ભોગિભોગોત્તમાઙ્ગમ્ ।

તુઙ્ગોત્સઙ્ગાઙ્ગસઙ્ગપ્રમુદિતગિરિજાલિઙ્ગિતાઙ્ગં ચ નેડે
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાપારપૂરૈકસિન્ધો ॥ ૬॥

મત્વા પાપાનુતાપં પુનરપિ જનનક્લેશકોશાવકાશં
શ્રુત્વા કાશીમશેષશ્રુતિશિખરમતાનન્દપીયૂષરાશિમ્ ।
શ્રુત્વા પ્યાશાતિપાશપ્રશમનશમિતં (શમનં) ન શ્રયામો નિતાન્તં
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૭॥

વારં વારં સ્મરામિ સ્મરહરચરણૌ નાદરેણ ક્ષણેન
ક્ષીણપ્રાણપ્રયાણક્ષણકરણરણપ્રેક્ષણાદક્ષિણોઽપિ ।
પ્રાણપ્રાણાગ્નિહોત્રવ્રતહિતનિયમઃ કામકામપ્રકામં
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસાર પૂરૈકસિન્ધો ॥ ૮॥

સ્મૃત્વા સ્મૃત્વાઽપિ કાલજ્વલદનલકુલસ્તમ્ભસમ્ભારભાર-
વ્યાપારારમ્ભભીતિં યમભટઘટનાટ્ટાટ્ટહાસોપહાસાન્ ।
ભીતો ભીતોઽપિ ભૂતપ્રતિભટવિષયૈર્નાર્ચયામો યમારિં
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૯॥

સાનન્દં વેદવન્દ્યં સ્મરહરચરણારાધનધ્યાનદાન-
વ્યક્તાસક્તસ્વકર્મપ્રતિભુવમભવં મોક્ષદાને ભવ ત્વામ્ ।
ન ત્યક્ષ્યે લક્ષશોઽપિ ક્ષણમપિ મરણેઽપ્યઙ્ઘ્રિપદ્મં તવેશ
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાપારપૂરૈકસિન્ધો ॥ ૧૦॥

નગ્નો ગૌરીસહાયસ્સ્મૃતિજનિતનિજાનન્દસન્દોહમગ્નો
લગ્નસ્વર્ગાપવર્ગપ્રદદ મઘહરાપારલિઙ્ગાર્ચનેઽપિ ।
નોદ્વિગ્નઃ પાપકોપપ્રચુરવિષયજાપારદુઃખામ્બુરાશેઃ
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈકસિન્ધો ॥ ૧૧॥

ગર્ભાવિર્ભાવભોગવ્યપગમસુગમોપાયશીતાંશુકાય-
શ્રીપાદામ્ભોજપૂજાજિતનિજજનનવ્યાજજાતદ્વિજશ્રીઃ ।
વિજ્ઞાભિજ્ઞોનભિજ્ઞચ્યુતવિતતમતિર્નામૃતં ત્વાં ભજામિ
ત્ર્યક્ષાક્ષોભ્યાપરાધાન્ હર હર કરુણાસારપૂરૈક સિન્ધો ॥ ૧૨॥

ત્ર્યક્ષ સ્વાશ્રિતરક્ષકાદિભવનાધ્યક્ષાધુના રક્ષ માં
રક્ષ્યં રક્ષ્યમુપેક્ષસે કિમિતિ માં દક્ષોઽપિ મદ્રક્ષણે ।
ભાલાક્ષાક્ષરવીક્ષણાક્ષયમહાવિક્ષેપદાક્ષાયણી-
વક્ષોજસ્ફુરદક્ષવિક્ષયકૃપાલક્ષ્યં પરીક્ષ્ય ક્ષણમ્ ॥ ૧૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વીરેશ્વરસ્તુતિઃ - ૪ - ત્ર્યક્ષાક્ષોભ્યાપરાધહરણાર્થ નિવેદનં સમ્પૂર્ણમ્ ॥

બૃહસ્પતિશતાનન્દસંવાદે વીરેશ્વરસ્તુતિવર્ણનં
- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૭। ૯૧-૧૦૩ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 47. 91-103 ..

Proofread by Ruma Dewan

---

*Vireshvara Stuti - 4*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*